दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णतृतीया
कार्तिक 12 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-6 ■ अङ्क-04 | 1 | अक्तूबर 28, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 भारतेन न्यूजीलैण्ड-देशः षड् स्तोभैः पराजित्य पञ्च-स्पर्धात्मिकायां शृङ्खलायां त्रि-शून्यम् इत्यनेन अजेया अग्रता प्राप्ता

4 मुख्यमन्त्रिणः सुक्खू-महोदयस्य महती घोषणा, देवी-देवतानाम् अपर्ण-धने पञ्चप्रतिशतं तथा वाद्यवादकानां मानदेये दशप्रतिशतं वृद्धिः

9 वित्तवर्षस्य २०२६-२७ प्रथमत्रैमासिके भारतस्य 'जीडीपी' (सकल-घरेलू-उत्पादः) ७.८ प्रतिशतं संवर्धितम् राज्यमन्त्री जितिन-प्रसादः

द्वादश-ब्रिक्स-संसदीय-मञ्चस्य संयुक्त-घोषणा-पत्रस्य अङ्गीकरणेन सह समापनम्, सदस्य-राष्ट्रैः सर्व-प्रकारकाणाम् आतङ्कवादी-कृत्यानाम् आपराधिकत्वं निरूप्य कृता तीव्रा भर्त्सना



हिमसंस्कृतवार्ता। द्वादशः ब्रिक्स-संसदीय-मञ्चः सर्वसम्मत्या संयुक्त-घोषणा-पत्रस्य अङ्गीकरणेन सह विधिवत् सम्पन्नताङ्गतः। द्वि-दिवसीय-मञ्चस्य द्वितीये अथ अन्तिमे दिवसे लोकसभाध्यक्षेण द्वादश-ब्रिक्स-संसदीय-मञ्चस्य च अध्यक्षेण ओम बिरला इत्यनेन संयुक्त घोषणा-पत्रस्य सर्वसम्मत-स्वीकृतये प्रस्तावः उपस्थापितः, यः सर्वैः सदस्यदेशैः एकस्वरेण अनुमोदितः । तदनन्तरं लोकसभाध्यक्षेण ओमबिरला इत्यनेन सप्तविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य कृते ब्रिक्स-संसदीय-मञ्चस्य अध्यक्षता औपचारिकरूपेण चीन-देशाय समर्पिता। पश्चात् संविधान-सदनस्य केन्द्रीय-कक्ष्ये स्वकीय-समापन-भाषणं कुर्वता बिरलावर्येण वैश्विक-सङ्कटानां सम्मुखीकरणाय राष्ट्राणां मध्ये संवादस्य, परस्पर विश्वासस्य, सहयोगस्य च संवर्धनाय आह्वानं विहितम्। श्रीबिरलावर्येण प्रतिपादितं यत् विचारेषु, पृष्ठभूमौ, आन्तरिक-आह्वानानां च वैषम्ये सत्यपि ब्रिक्स-सदस्यदेशाः मानव-कल्याणाय, विश्व-शान्तये, समृद्धये च समानरूपेण दृढप्रतिबद्धाः सन्ति। नवदेहल्याम् आयोजितस्य द्वादश-ब्रिक्स-संसदीयमञ्चस्य अन्तिमे दिवसे सर्वसम्मत्या अङ्गीकृते संयुक्त-घोषणा-पत्रे सदस्य देशैः संयुक्त राष्ट्र सङ्घस्य घोषणा-पत्रस्य उद्देश्यानां सिद्धान्तानां चानुरुपं नागरिकाणां अथ च असैन्य-अवसंरचनायाः संरक्षणं सुनिश्चेतुं आह्वानं कृतम्। ब्रिक्स-सदस्यदेशैः क्षेत्रे दीर्घकालिक शान्तेः, सुरक्षायाः, स्थैर्यस्य च संवर्धनाय संवादस्य कूटनीतेश्च माध्यमेन दीर्घकालिक सन्धये प्रयासाः तीव्रतराः करणीयाः इति प्रतिपादितम्। ब्रिक्स-राष्ट्रैः कस्यापि प्रेरणायाः आधारेण, कदापि, केनापि वा कृतानाम् आतङ्कवादी-कृत्यानाम् अपराधिकत्वं निराधारत्वं च निरूप्य तेषां तीव्रा भर्त्सना कृता। सदस्य देशैः पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य अप्रैल-मासस्य द्वाविंशति-दिनाङ्के जम्मूकश्मीरे सञ्जातस्य आतङ्कि-आक्रमणस्य कठोरतम-शब्देषु निन्दा कृता, यस्मिन् षड्विंशतिः नागरिकाः मृताः बहवश्च व्रणिताः आसन्। सदस्य-राष्ट्रैः सर्वतो भावेन आतङ्कवादस्य निर्मूलनाय दृढ-प्रतिबद्धता पुनरुद्घोषिता। अनेनैव सह ब्रिक्स-देशैः जलवायु-परिवर्तनस्य गम्भीर समस्यायाः तत्कालिक समाधानस्य आवश्यकता अपि अङ्गीकृता।

अद्यतनीयं सुभाषितम्

आपत्सु किं विषादेन सम्पतौ विस्मयेन किम्।
भवितव्यं भवत्येव कर्मणामेष निश्चयः।।

भावार्थः- विपत्ति के आने पर विषाद करने से और धन संपत्ति प्राप्त होने पर हर्ष एवं आश्चर्य करने से कुछ नहीं होगा क्योंकि जिस तरह के कर्म होंगे उनके अनुसार ही जो होना होता है वह अवश्य ही घटित होगा।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तायां दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

स्वदेशी-वैज्ञानिकोपलब्धीनाम् उदयोन्मुख-प्रौद्योगिकीनां च विशालायाः नवान्वेषण-प्रदर्शिन्याः उद्घाटनं कृतवान् प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदेहल्यां भारतमण्डपम् इत्यत्र स्वदेशी-वैज्ञानिकोपलब्धीनाम् उदयोन्मुख-प्रौद्योगिकीनां च विशालायाः नवान्वेषण-प्रदर्शिन्याः उद्घाटनं विहितम्। प्रधानमन्त्री प्रदर्शिन्याः विभिन्नान् विभागान् निरीक्ष्य तत्रत्यैः अन्वेषकैः उद्यमिभिश्च सह संवादं कृतवान्। अस्यां प्रदर्शिन्यां प्रायः सार्धेकशतं डीप-टेक-नवप्रतिष्ठानानां प्रकोष्ठकाः स्थापिताः सन्ति, ये नूतन-प्रौद्योगिकीय-विकासांस्तेषां विविध क्षेत्रेषु सम्भाव्य-प्रयोगांश्च प्रकाशयन्ति ।

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां युवराजेन आलोइस इत्यमुना सह विहितवान् द्विपक्षीयां वार्ताम्

प्रधानमन्त्री नरेन्द्रमोदी नवदेहलीस्थे हैदराबाद-भवने लिक्टेन्स्टाइन-साम्राज्यस्य कार्यवाहक-राष्ट्राध्यक्षेण युवराजेन आलोईस इत्यमुना सह द्विपक्षीय वार्ता विहितवान्। मेलने उभाभ्यां नेतृभ्यां व्यापारः, निवेशः, विज्ञानं, प्रौद्योगिकी, नवोन्मेषः अथ च जन-परस्पर सम्पर्कः इत्यादिषु महत्त्वपूर्ण-क्षेत्रेषु विस्तृता चर्चा कृता। अस्य सहैव ताभ्यां क्षेत्रीय-वैश्विक विषयेषु अपि स्व-विचाराः परस्परं विमर्शिताः। राष्ट्रपति-भवनस्य प्राङ्गणे युवराजस्य आलोईस इत्यस्य औपचारिक-सैन्य-सम्मानेन भव्यं स्वागतं कृतम्, यत्र राष्ट्रपतिः द्रौपदी मुर्मुः प्रधानमन्त्री नरेन्द्रमोदी च तस्य अभिनन्दनम् अकुरुताम्। वार्ताहर-सम्मेलने भाषमाणेन युवराजेन आलोईस-वर्येण प्रतिपादितं यत् तस्य एषः भारत-प्रवासः भारत-लिक्टेन्स्टाइन-सम्बन्धानां महत्त्वस्य प्रत्यक्षं प्रमाणम् अस्ति। तेनोक्तं यत् भारतेन सह सम्पन्नः व्यापार-आर्थिक सहभागिता-सन्धिः यश्च वर्षपूर्व प्रभावङ्गतः सः अस्यां दिशि महान् कीर्तिस्तम्भः वर्तते।



सरदार-वल्लभभाई-पटेल-महोदयस्य दूरदृष्ट्या, दृढ सङ्कल्पेन, कुशल नेतृत्वेन च भारतस्य राष्ट्रियैक्यतायाः भौगोलिक-अखण्डतायाश्च सुदृढा आधारशिला स्थापिता - शिवराज-पटेलः



केन्द्रीय-कृषि-कृषक-कल्याण-मन्त्री शिवराज सिंह चौहानः अवदत् यत् सरदार-वल्लभभाई-पटेल-महोदयस्य दूरदृष्ट्या, दृढ सङ्कल्पेन, कुशल नेतृत्वेन च भारतस्य राष्ट्रियैक्यतायाः भौगोलिक-अखण्डतायाश्च सुदृढा आधारशिला स्थापिता। मन्त्री चौहानः नवदेहल्यां स्थितस्य आकाशवाणी-भवनस्य तत्त्वावधाने आयोजिते सप्तषष्टितमे सरदार पटेल-स्मृति-व्याख्याने आभासीय-माध्यमेन सम्बोधनं कुर्वन् एतान् विचारान् प्राकटयत्। श्रीचौहानेन प्रतिपादितं यत् पञ्चषष्ट्यधिक पञ्चशतं देशीय क्षेत्राणि एकत्र संयोज्य अखण्ड-भारतस्य निर्माणाय सरदार-पटेल-महोदयेन कृताः भगीरथ प्रयासाः देशस्य इतिहासे सदैव कञ्चन युगप्रवर्तकः अध्यायः भविष्यति। मन्त्रिणा सबलं प्रोक्तं यत् सरदार पटेलस्य अखण्ड-भारतस्य दिव्य-दृष्टिः अद्य एकं भारतम्, श्रेष्ठं भारतम् इति सङ्कल्प-माध्यमेन समग्र राष्ट्र निरन्तरं प्रेरयति।

पर्यावरण-मन्त्री भूपेन्द्र यादवः जैविक विविधता-विषये संयुक्तराष्ट्र-सङ्घस्य सम्मेलनस्य सप्तदश-सदस्य-पक्ष-सम्मेलनस्य उच्च-स्तरीय-खण्डे भागं ग्रहीतुम् आर्मेनिया-देशस्य येरेवान-नगरं सम्प्राप्तवान्



पर्यावरण-मन्त्री भूपेन्द्रयादवः जैविक विविधता-विषये संयुक्तराष्ट्र-सङ्घस्य सम्मेलनस्य सप्तदश-सदस्य-पक्ष-सम्मेलनस्य उच्च-स्तरीय-खण्डे भागं ग्रहीतुम् आर्मेनिया-देशस्य येरेवान्-नगरं सम्प्राप्तवान्। सम्मेलनावधौ श्रीयादवः द्विपक्षीय-बहुपक्षीय-मञ्चेषु जैवविविधता संरक्षणे भारतस्य प्रयत्नान् उपलब्धीः च प्रकाशयिष्यति। सामाजिक सञ्चार-पटले मन्त्रिणा संसूचितं यत् देशस्य संरक्षणोपक्रमाः द्वाविंशत्यधिक-द्विसहस्रतमे वर्षे स्वीकृतस्य कुन्मिङ्ग मॉन्ट्रियाल वैश्विक-जैवविविधता-सङ्कल्प-प्ररूपस्य लक्ष्याणां प्राप्तये अतीव महत्त्वपूर्णाः सन्ति। अस्याः रूपरेखायाः मुख्यम् उद्देश्यं त्रिंशदधिक-द्विसहस्रतमं वर्ष यावत् जैवविविधतायाः हानेः निवारणं, तस्याः पुनर्बलीकरणं, अथ च पञ्चाशदधिक-द्विसहस्रतमवर्ष यावत् मानवजातिः प्रकृत्या सह सामञ्जस्येन जीवेत् इति सुनिश्चितीकरणं वर्तते।

अर्नब-चक्रवातः आन्ध्रप्रदेशस्य तटाभिमुखम् अग्रे सरति, तट-सङ्घातस्य वर्तते सम्भावना

अर्नब-नामकः तीव्र-चक्रवातीय-झञ्झावातः आन्ध्रप्रदेशस्य तटं प्रति द्रुतगत्या अग्रेसरनन्नस्ति, यस्य तटे समाघातस्य सम्भावना वर्तते। अस्य झञ्झावातस्य प्रभावतः ओडिशा-राज्यस्य कतिपयेषु दक्षिण-जनपदेषु अत्यन्त प्रबला वृष्टिः तीव्र-पवनाश्च आगमिष्यन्ति इति पूर्वसूचना वर्तते। ओडिशा-सर्वकारेण आपद्-प्रतिकार-दलानि विनियोजितानि, साहाय्य शिबिराणि च सज्जीकृतानि, अथ संवेदनशील-पर्यटन-स्थलेषु प्रवेशः प्रतिबन्धितः। अधिकारिभिः प्रायः अष्टचत्वारिंशत्-सहस्रजनाः सुरक्षित-स्थानेषु प्रापयितुं स्थानान्तरण कार्यं प्रारब्धम्। प्रभावित-मण्डलेषु विद्यालयाः अद्य, श्वश्च पिहिताः भविष्यन्ति, समुद्रस्य दशा अतीव अशान्ता वर्तते इति हेतोः मत्स्यजीविनः समुद्रगमनं परिहर्तुमुपदिष्टाः। अपरतः आन्ध्रप्रदेशस्य मुख्यमन्त्रिणा एन. चन्द्रबाबू नायडु इत्यमुना संसूचितं यत् सर्वकारः भू-स्तरीय-परिस्थितेः निरन्तरं समीक्षणं करोति। आपत्कालस्य सम्मुखीकरणाय एकादशसु संवेदनशील-जनपदेषु राष्ट्रिय-आपद्-मोचन-बलस्य अथ च राज्य आपदा-मोचन-बलस्य दलानि त्वरित-गत्या नियुक्तानि सन्ति।



आदित्येन विश्व-ऊनोनविंशति-वर्षीय-मुष्टियुद्ध-प्रतियोगितायां स्वर्णपदकं विजितम्

(आदित्यः विश्व-अण्डर्-१९-मुष्टियुद्ध-प्रतियोगितायां स्वर्णपदकं विजितवान्)

भारतस्य आदित्येन मोन्टेनेग्रो-देशे आयोजितायां विश्व-अण्डर्-१९ (एकोनविंशति-वर्षेभ्यः न्यूनावस्था) मुष्टियुद्ध-प्रतियोगितायां स्वर्णपदकं विजितम्। आदित्यः पुरुषाणां पञ्चपञ्चाशत्-(५५)-किलोग्राम-भारवर्गस्य अन्तिमस्पर्धायां (फाइनल्-मध्ये) रूस-देशस्य इस्लाम-मागोमेदोव-महाभागं ४-१ इति अङ्कैः पराजितवान्। मेघा-शेओकन्दः इतः किञ्चित्कालानन्तरं महिलानाम् अशीति-(८०)-किलोग्राम-भारवर्गस्य अन्तिमस्पर्धायां रूस-देशस्य एकातेरिना-फ्रोलोवा-महोदयया सह स्पर्धिष्यते। इतः पूर्वं भारतस्य हर्षिकया महिलानां पञ्चषष्टि-(६५)-किलोग्राम-भारवर्गे तथा च प्राची-टोकासेन अशीति-(८०)-किलोग्रामात् अधिकभारवर्गे कांस्यपदकं विजितमासीत्।

भारतेन न्यूजीलैण्ड-देशः षड् स्तोभैः पराजित्य पञ्च-स्पर्धात्मिकायां शृङ्खलायां त्रि-शून्यम् इत्यनेन अजेया अग्रता प्राप्ता



भारतेन वेलिङ्ग्टन-नगरे सम्पन्नायां तृतीयायां विंशति-प्रतिविंशतिः अन्ताराष्ट्रिय स्पर्धायां न्यूजीलैण्ड-देशः षड्-स्तोभैः पराजितः। अनेन महता विजयेन सह भारतेन पञ्च-स्पर्धात्मिकायां शृङ्खलायां त्रि-शून्यं इत्यङ्कान्तरालेन अग्रता सम्प्राप्ता। नवनवत्यधिकैकशत-धावनाङ्कानां लक्ष्यम् अनुधावत् भारतीय-दलं केवलं त्रयोदश दशमलव-द्विक्षेपणचक्रेषु चतुर्कीडकानां हानौ विजय लक्ष्यं प्राप्तवत् । भारतस्य आरम्भिक क्रीडकेन अभिषेक शर्मणा केवलम् अष्टत्रिंशत् कन्दुकेषु त्रयोदशाधिकशतं धावनाङ्काः समर्ज्य अत्यद्भुतं क्रीडनं प्रदर्शितम्। स्वकीय-विजेतृ-प्रदर्शनाय अभिषेक शर्मा स्पर्धायाः श्रेष्ठ-क्रीडकः इति घोषितः।



कार्तिकमासमाहात्म्यं व्रतस्नाननियमाश्च

भगवतो नारायणस्य शयनप्रबोधाभ्यां चातुर्मास्यस्य आरम्भसमाप्ती भवतः। उत्तरायणं देवकालः, दक्षिणायनं च आसुरकालः इति मन्यते। दक्षिणायने सत्त्वगुणक्षरणात् रक्षणार्थं शास्त्रेषु व्रततपसोः विधानं कृतमस्ति।

सूर्यस्य कर्कटराशौ प्रवेशः दक्षिणायनस्य प्रारम्भः मन्यते, कार्तिकमासश्च अस्यामेव अवधौ भवति। पुराणादिशास्त्रेषु कार्तिकमासस्य विशेषं महत्त्वं वर्णितम्। प्रत्येकमासस्य पृथक् महत्त्वं भवति, तथापि व्रततपोदृष्ट्या कार्तिकमासस्य महिमा अधिका वर्तते। शास्त्रेषु भगवान् विष्णुः विष्णुतीर्थं च यथा श्रेष्ठं दुर्लभं च, तथैव कार्तिकमासः अपि श्रेष्ठो दुर्लभश्च कथितः। शास्त्रेषु अयं मासः परमकल्याणकारी इति प्रोक्तः। सूर्ये तुलाराशिं गते कार्तिकमासः प्रारभते। अस्य माहात्म्यं पद्मपुराणे स्कन्दपुराणे च विस्तरेण लभ्यते। कलियुगे कार्तिकमासः मोक्षसाधनरूपेण दर्शितः। अयं मासः धर्मार्थकाममोक्षप्रदः इति प्रोक्तः। नारायणेन स्वयं ब्रह्मणे, ब्रह्मणा नारदाय, नारदेन च पृथुमहाराज्ञे अयम् उपदिष्टः।

- आचार्य अरविन्दः
चुवाड़ी जिला चम्बा हि प्र

उच्चन्यायालयस्य स्पष्टोक्तिः

न्यायालस्य आदेशे व्याजोक्तिः न प्रचलिष्यति,

सर्वकाराय सप्ताहत्रयस्य कालसीमा प्रदत्ता



हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेश- उच्चन्यायालयेन न्यायालयीय-आदेशानाम् अप्रवर्तने तेषां क्रियान्वयने च विलम्बकरणे राज्यसर्वकारस्य दृष्टिकोणं प्रति तीव्रा अप्रसन्नता प्रकटिता। न्यायाधीशायाः ज्योत्सना-रिवालदुआ-महोदयायाः पीठेन आदेशस्य सम्पूर्णतया पालनाय सर्वकाराय सप्ताहत्रयस्य (३ सप्ताहानाम्) अन्तिमः अवसरः प्रदत्तः। सहैव याचिकाकर्त्रे १० सहस्ररूप्यकाणां क्षतिपूर्तिराशिं प्रदातुं चापि आदेशः दत्तः। न्यायालयेन अयम् आदेशः याचिकाकर्तुः जोगिन्द्रकुमारस्य पक्षतः प्रविष्टायाः निष्पादनयाचिकायाः (एक्जीक्यूशन-पिटीशन) श्रवणे कृते सति निर्गतः। उच्चन्यायालयेन राज्यसर्वकाराय दृढनिर्देशाः दत्ताः यत् सः विना कञ्चन व्याजं मूलनिर्णयानुरूपं सद्य एव आवश्यकानि पदक्षेपाणि कुर्यात्। अग्रिमा श्रवणप्रक्रिया १८ नवम्बर दिनाङ्के भविष्यति।

याचिकाकर्ता जोगिन्द्रकुमारः मूलरूपेण 'ओमप्रकाशः विरुद्धं हिमाचलराज्यम्' इति अभियोगे सम्मिलितः आसीत्। अस्मिन् विषये ७ जुलाई २०२३ दिनाङ्के उच्चन्यायालयेन निर्देशः दत्तः आसीत् यत् याचिकाकर्तृभ्यः १ अक्तूबर २०१२ दिनाङ्कात् मुख्यशिक्षकपदे पदोन्नति-वेतनवृद्धिः (प्रमोशनल इङ्क्रीमेण्ट) निर्गमनीया। न्यायालयेन स्पष्टम् उक्तम् आसीत् यत् इयं प्रक्रिया षट्सु सप्ताहेषु सम्पूर्णतया समापनीया। उच्चन्यायालयेन सितम्बर २०२५ मासे एव सर्वकाराय अनुपालन- शपथपत्रं (कम्प्लायन्स एफिडेविट) प्रत्युत्तरं वा प्रवेष्टुं निर्देशः प्रदत्तः आसीत्। एकाब्दात् (एकवर्षात्) अधिके काले व्यतीतेऽपि सर्वकारपक्षतः किमपि आधिकारिकं शपथपत्रं न प्रविष्टम्। श्रवणकाले राज्यस्य अतिरिक्त- महाधिवक्त्रा प्रारम्भिक- शिक्षा-उपनिदेशकस्य (काङ्गड़ा) एकः आदेशः उपस्थापितः, यस्मिन् उक्तं यत् विभागेन याचिकाकर्तुः प्रकरणस्य समीक्षा कस्यचिद् अन्यस्य विषयस्य ('सूर्याप्रभा विरुद्धं हिमाचलराज्यम्') सन्दर्भे विहिता। अस्मिन् विषये न्यायालयेन दृढापत्तिं प्रकटयन् उक्तं यत् यदा न्यायालयेन याचिकाकर्तुः पक्षे प्रत्यक्षः स्पष्टश्च निर्णयः श्रावितः आसीत्, तदा विभागस्य समीपे न्यायालयस्य निर्णयात् उपरि उपविश्य तस्य पुनः समीक्षां कर्तुं वा तं कञ्चिद् अन्येन विषयेण सह संयोजयितुं वा कोऽपि अधिकारः नास्ति। न्यायालयेन स्पष्टीकृतं यत् विभागस्य कार्यं केवलं निर्णयस्य पालनं वर्तते, तस्योपरि पुनर्विचारः न।



अंशविपणिसमाचारः

भारतीयांशविपण्यां स्थिरता दृष्टा

हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, मुम्बई, दिनाङ्कः २७ अक्टूबर २०२६

मङ्गलवासरे भारतीयांश-विपण्यां उन्नतावनतपूर्ण-व्यवसायानन्तरं प्रमुखसूचकाङ्कयोः प्रायः स्थिरता दृष्टा। बम्बई-शेयर-विपण्यस्य त्रिंशदंशात्मकः सेन्सेक्स-सूचकाङ्कः ८.०८ अङ्कानां (०.०१ प्रतिशतस्य) ह्रासेन ७३,५९८.६७ अङ्केषु आगच्छतु। तथैव राष्ट्रिय- शेयर-विपण्याः निफ्टी- पञ्चाशत्- सूचकाङ्कः ३.४५ अङ्कानां (०.०२ प्रतिशतस्य) ह्रासेन २२,७४९.७५ अङ्केषु अवरुद्धः।अद्यतनव्यवसाये भारती-एयरटेल, ट्रेण्ट तथा मारुतिसुजुकी इत्यादीनां संयन्त्राणां अंशमूल्येषु वृद्धिः अभवत्। अपि च भारतीयस्टेटवित्तकोषस्य, एक्सिसवित्तकोषस्य, टीसीएससंस्थायाः अंशमूल्येषु ह्रासः अभिलक्षितः। प्रमुखसूचकाङ्कयोः न्यूनपरिवर्तनस्य सत्त्वेऽपि मध्यमूलधन-कृतसंयन्त्राणां, लघुमूलधन- कृतसंयन्त्राणां शेयरमूल्येषु वृद्धिः दृश्यते स्म।अन्ताराष्ट्रिय-विपण्याम् अपरिष्कृततैलस्य वर्धमानमूल्यं, पश्चिम-एशियायां विद्यमानः संघर्षः, अमेरिकी- केन्द्रीय- वित्तकोषस्य सम्भावितः मौद्रिकनीतिसम्बन्धी निर्णयः च निवेशकानां मनसि सावधानतां जनयन्ति। एतेषां कारकाणां प्रभावः भारतीयांशविपण्याम् अपि दृश्यते। विदेशीयसंस्थागतनिवेशकानां विक्रयप्रवृत्तिः अपि विपण्याः गतिं प्रभावितवती। तद्विपरीतं, स्वदेशीय-संस्थागतनिवेशकाः अंशक्रयणेन विपण्यां समर्थनं प्रदत्तवन्तः। आगामिषु दिवसेषु अन्ताराष्ट्रिय-आर्थिक- परिस्थितयः, अपरिष्कृततैलस्य मूल्यं, प्रमुखसंयन्त्राणां त्रैमासिक- वित्तीयपरिणामाः, केन्द्रीय- वित्तकोषानां मौद्रिकनीतयः भारतीयांशविपण्याः दिशं निर्धारयितुं महत्त्वपूर्णां भूमिकां निर्वक्ष्यन्ति। अतः निवेशकैः सावधानतया, सम्यक् अध्ययनपूर्वकं च कृत्वा निवेशसम्बन्धिनः निर्णयाः करणीयाः।

अर्जितावकाशस्य परिमाणे आर्थिक-लाभार्थं शिक्षकानां प्रतीक्षा संवर्धिता

यावत् न्यायालयेन

अन्तिमनिर्णयः न दीयते, तावत् अग्रे किमपि कार्यं न भविष्यति

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य सर्वकारीय- विद्यालयेषु सेवारतेभ्यः पञ्चदशभ्यः (१५) शिक्षकेभ्यः अर्जितावकाशस्य स्थाने आर्थिकलाभं प्राप्तुम् अधुना प्रतीक्षा करणीया भविष्यति। विद्यालय- शिक्षा- निदेशालयेन शिक्षकाणां पक्षतः प्रविष्टानां निवेदनानां निस्तारणं कुर्वता स्पष्टीकृतं यत् सम्बद्धे विषये यावत् न्यायिकप्रक्रिया न समाप्यते, तावत् तेषां वित्तीयपक्षेषु किमपि अग्रिमं कार्यं कर्तुं न शक्यते। अस्यां स्थितौ शिक्षकाणाम् अवकाश-नकदीकरणार्थं तत्सम्बद्धाय आर्थिक-



अवशिष्टधनाय (एरियर) च सर्वकारस्य याचिकोपरि अन्तिमस्य न्यायिकनिर्णयस्य प्रतीक्षा करणीया भविष्यति। प्रकरणस्यानुसारं सम्बद्धाः पञ्चदश शिक्षकाः स्वकीयां प्रारम्भिकनियुक्तिदिनाङ्कात् सेवां पूर्वापेक्षितरूपेण (भूतलक्षी-आधारेण) नियमितां मत्वा अर्जितावकाशस्य परिवर्ते आर्थिकलाभं निर्गमयितुं याचितवन्तः आसन्।

शिक्षकाणां तर्कः आसीत् यत् यदि तेषां सेवाः प्रारम्भिकनियुक्तिदिनाङ्कात् नियमिताः मन्यन्ते, तर्हि ते तस्याः अवधेः कृते निर्धारितानां वित्तीयलाभानाम् अपि अधिकारिणः सन्ति। स्वपक्षस्य समर्थनार्थं शिक्षकैः हिमाचलप्रदेश- उच्चन्यायालयस्य 'अनीताकुमारी विरुद्धं हिमाचलप्रदेशसर्वकारः' इति अभियोगे आगतस्य निर्णयस्य उल्लेखः कृतः आसीत्। इममेव निर्णयम् आधारं विधाय तैः विभागात् अर्जितावकाशस्य नकदीकरणं सम्बद्धानां च आर्थिकलाभानां प्रदानाय आग्रहः कृतः आसीत्। शिक्षा- निदेशालयेन निवेदनानि विनिर्णयता उक्तं यत् शिक्षकाणां पक्षतः यस्य न्यायिकनिर्णयस्य उल्लेखः क्रियते, तत्सम्बद्धं प्रकरणम् अधुनापि अन्तिमतया न निर्णीतम्।राज्यसर्वकारेण अस्मिन् प्रकरणे पुनर्याचिका प्रविष्टा अस्ति। अस्यां स्थितौ तस्याम् याचिकायाम् अन्तिमनिर्णयात् पूर्वं शिक्षकाणां वित्तीयदावेषु किमपि अग्रिमं चिन्तनं कर्तुं न शक्यते। अस्मिन् विषये अधुना शिक्षकाणां दृष्टयः सर्वकारेण प्रविष्टकृतायां पुनर्याचिकायाम् आगमिष्यतः अन्तिमनिर्णयोपरि लग्नाः सन्ति। न्यायिकप्रक्रियायाः समाप्तेः अनन्तरमेव इदं स्पष्टं भवितुं शक्ष्यति यत् सम्बद्धाः शिक्षकाः अर्जितावकाशस्य स्थाने नकद-वित्तीयलाभं प्राप्तुं पात्राः भविष्यन्ति न वा इति।

मुख्यमन्त्रिणः सुक्खू-महोदयस्य महती घोषणा, देवी-देवतानाम् अपर्ण-धने पञ्चप्रतिशतं तथा वाद्यवादकानां मानदेये दशप्रतिशतं वृद्धिः



हिमसंस्कृतवार्ताः- कुल्लू।

अन्ताराष्ट्रिय- कुल्लू- दशहरा-महोत्सवस्य समापनसमारोहे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः देवभूमये कुल्लवे विकासकार्याणां देवसंस्कृतेः संरक्षणस्य च अनेकान् उपहारान् प्रददात्। ऐतिहासिके लालचन्दप्रार्थी-कलाकेन्द्रे आयोजिते समारोहे मुख्यमन्त्रिणा देवी-देवतानां नजराना-धने (देवोपहारे) पञ्चप्रतिशतं (५%) तथा वाद्यवादकानां (बजन्तरियों) मानदेये दशप्रतिशतं (१०%) संवर्धनस्य घोषणां कृत्वा देवसमाजो बहुमानितः। अनेन सहैव गूर-जनेभ्यः महिलामण्डलेभ्यश्च अपि आर्थिकसाहाय्यस्य घोषणा कृता।मुख्यमन्त्रिणा प्रत्येकाय गूर-जनाय ११००-११०० रूप्यकाणि तथा महिलामण्डलेभ्यः ३५-३५ सहस्ररूप्यकाणि प्रदातुं घोषणा विहिता। एताभिः घोषणाभिः कुल्लोः समृद्धायाः देवपरम्परायाः, लोकसंस्कृतेः, सामाजिकसहभागितायाश्च संवर्धनं भविष्यति इति सम्भाव्यते। अन्ताराष्ट्रिय- दशहरा-महोत्सवे देवी-देवैः सह वाद्यवादकानां, कारकून-सेवकानां, देवलु-भक्तानां च महत्त्वपूर्णा भूमिका भवति। अस्यां स्थितौ नजराना-धने मानदेये च वृद्धिः देवसमाजस्य गौरवरूपेण अवलोक्यते। मुख्यमन्त्रिणा कुल्लू-मनाली-वामतटमार्गस्य तारकोल- लेपनाय (टायरिंग-कार्याय) पञ्चकोटिरूप्यकाणि प्रदातुं घोषणा कृता। भुन्तरनगरे मलनिस्यन्दनाव्यवस्थायाः (सीवरेज-व्यवस्थायाः) विस्ताराय २२ कोटिरूप्यकाणि प्रदातुं विज्ञापितम्। अनेन क्षेत्रे आधारभूतसुविधानां सुदृढीकरणस्य आशा वर्तते। भुन्तरे विद्युत्-उपमण्डल-द्वितीयम् उद्घाटयितुं घोषणां कृत्वा क्षेत्रस्य विद्युत्सम्बद्धानाम् आवश्यकतानां पूरणाय पदक्षेपः विहितः। तथैव कमान्दतः बाराहारमार्गार्थं ५० लक्षरूप्यकाणि प्रदातुं घोषणा कृता। बजौरा-विद्यालये सुरक्षाभित्तेः विज्ञानप्रयोगशालायाश्च संरक्षणाय २१ कोटिरूप्यकाणि प्रदातुं घोषणा विहिता। अनेन विद्यालयस्य आधारभूतसंरचनां सुदृढीकर्तुं छात्रेभ्यश्च उत्तमाः शैक्षणिकसुविधाः समुपलब्धं कारयितुं मार्गः प्रशस्तः भविष्यति।

कुल्लू-दशहरायाः समापने मुख्यमन्त्रिणः एतासु घोषणासु देवसंस्कृतेः गौरवादारभ्य मार्ग- विद्युत्-मलनिस्यन्दना-शिक्षा-पर्यन्तानि अनेकानि प्रमुखक्षेत्राणि समाविष्टानि आसन्। उत्सवस्य मञ्जात् प्राप्ताभिः एतैः उपहारैः मण्डले विकासकार्याणि गतिं लप्स्यन्ते इत्याशा समुद्भूता अस्ति।



हिमाचले पुनः विपत्स्यते ऋतुः, पञ्च दिनानि यावत् वृष्टेः हिमपातस्य च सम्भावना

हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेशे पश्चिमी-विक्षोभस्य प्रभावेण पुनः एकवारं ऋतोः दशाः परिवर्तमानाः सन्ति। राज्ये निरन्तरं पञ्च दिनानि यावत् ऋतुः विकृतं (प्रतिकूलं) स्थास्यति इति अनुमानं वर्तते। ऋतुविभागस्यानुसारं २९ अक्तूबर तः २ नवम्बर यावत् राज्यस्य बहुषु भागेषु वृष्टिः, उच्च- पार्वत्य- क्षेत्रेषु च हिमपातः भवितुं शक्नोति। अपरत्र २९ तथा ३० अक्टोबर् दिनाङ्कयोः बहुषु मण्डलेषु चक्रवातस्य (झंझावातस्य), विद्युतः, वृष्टेश्च 'पीतसचेतना' निर्गता अस्ति। अस्मिन् समये तापमाने न्यूनता समागन्तुं शैत्यं च प्रवर्धितुं सम्भावना अस्ति। मङ्गलवासरे प्रदेशे ऋतुः स्वच्छम् आसीत्, शिमलायां मनाल्यां च आदिनं सूर्यप्रकाशः प्रस्फुटितः आसीत्। आगामिषु चतुर्विंशति-होरासु (२४ घण्टासु) अर्थात् २८ अक्टोबर् दिनाङ्केऽपि ऋतुः स्वच्छं स्थास्यति इति पूर्वानुमानम् अस्ति। ऋतुविज्ञाशविभागानुसारं २९, ३० तथा ३१ अक्तूबर दिनेषु प्रदेशस्य सर्वेषु भागेषु ऋतुः प्रतिकूलं भवितुं सम्भावना वर्तते। प्रथमे नवम्बर दिनाङ्के मध्यपार्वत्येषु उच्चपार्वत्येषु च क्षेत्रेषु वृष्टि- हिमपातयोः सम्भावना अस्ति। यदा तु २ नवम्बर् दिने ऋतोः प्रभावः केवलम् उच्चपार्वत्यक्षेत्रेषु एव सीमितः भवितुं शक्नोति। अस्मिन् दिने समभूमि- मध्यपार्वत्यक्षेत्रेषु ऋतुः स्वच्छं स्थास्यति इति अनुमानम् अस्ति।

ऋतुविभागेन २९ अक्तूबर दिनाङ्के काङ्गड़ा- मण्डी- शिमला- सोलन- सिरमौरमण्डलेषु झंझावातस्य, विद्युतः, वृष्टेश्च 'पीत-सचेतना' निर्गता। अपरत्र ३० अक्तूबर दिने काङ्गड़ा-कुल्लू-मण्डी- शिमला-मण्डलेभ्यः पीतसचेतना स्थास्यति। एतेषु मण्डलेषु ऋतोः विकृत्या सह तीव्राः वाताः वहितुं, विद्युतः द्योतनं, वृष्टिश्च भवितुं सम्भावना वर्तते। पश्चिमी-विक्षोभस्य प्रभावेण प्रदेशस्य उच्चपार्वत्यक्षेत्रेषु हिमपातः भवेत् इति अनुमानम् अस्ति। अनेन पार्वत्यक्षेत्रेषु शैत्यं संवर्धितुं शक्नोति। ऋतुविज्ञानविभागस्य पूर्वानुमानानुसारम् आगामिषु पञ्चसु दिनेषु ऋतोः प्रभावः पृथक्-पृथक्-क्षेत्रेषु भिन्नः भविष्यति। विभागानुसारं सम्प्रति २८ अक्तूबर यावत् प्रदेशे वातावरणं स्वच्छं भवितुं सम्भावना वर्तते। तदनन्तरं पश्चिमी-विक्षोभस्य सक्रियीभवेन वृष्टेः हिमपातस्य च क्रमः प्रारब्धुं शक्नोति।

लाहौल-स्पीति-मण्डले न्यूनतं तापमानं शून्यात् अधः

अपरत्र मङ्गलवासरे हिमाचलप्रदेशस्य औसते न्यूनतमे तापमाने सामान्यस्य अपेक्षया ०.४ डिग्री-सेल्सियस परिमितं पतनं (ह्रासः) पञ्जीकृतम्। लाहौल-स्पीति-मण्डलस्य बहुषु क्षेत्रेषु न्यूनतमं तापमानं शून्यात् अधः एव वर्तते। मङ्गलवासरे प्रदेशे सर्वस्मात् न्यूनं तापमानं कुकुमसेरी-स्थले -२.१ डिग्री-सेल्सियस आसीत्। तदनन्तरं ताबोक्षेत्रे ०.२ डिग्री-सेल्सियस, केलाङ्ग-क्षेत्रे च ०.३ डिग्री-सेल्सियस न्यूनतमं तापमानं पञ्जीकृतम्। अन्येषु प्रमुखस्थानेषु कल्पा-क्षेत्रे ३.६ डिग्री- सेल्सियस, मनाल्यां ५.९ डिग्री-सेल्सियस, भुन्तरे ८.० डिग्री-सेल्सियस, सोलने ९.० डिग्री- सेल्सियस, सुन्दरनगरे ९.८ डिग्री-सेल्सियस तथा च शिमलायां १०.२ डिग्री-सेल्सियस न्यूनतमं तापमानम् अभवत्। धर्मशालायां न्यूनतमं तापमानं १३.४ डिग्री-सेल्सियस, नाहने १३.६ डिग्री- सेल्सियस, पावँटा-साहिबक्षेत्रे १८.० डिग्री- सेल्सियस अभवत्। प्रदेशस्य समभूमिप्रदेशेषु न्यूनतमं तापमानं पार्वत्यक्षेत्राणाम् अपेक्षया अधिकं पञ्जीकृतम्।

कांगड़ा जनपदे मादकद्रव्यं (चिट्टा)-तस्करीप्रकरणे एककोटिरूप्यकाणां सम्पत्तिः कुक्षिकीकृता, पुलिसद्वारा गृहे कारयाने च पट्टिका संस्थापिता।

हिमसंस्कृतवार्ताः- कांगड़ा। हिमचालप्रदेश-राज्ये चिट्टा- तस्करीविरुद्धम् अभियानं सञ्चालयन् नूरपुर-पुलिस-प्रशासनेन महती कार्यवाही कृता अस्ति। पुलिस-प्रशासनेन इन्दौरा- क्षेत्रस्य छन्नीग्रामे १,०१,५५,७१८ रूप्यकाणां मूल्यानां सम्पत्तीनां कुक्षीकरण-सम्बन्धि- आदेशस्य पट्टिका संस्थापिता। इयं कार्यवाही इन्दौरा-पुलिस-स्थाने सप्तदश-तमे (२०१७) वर्षे निक्षिप्ते चिट्टा-तस्करी-प्रकरणे कृता अस्ति। पुलिस-अनुसारं, सक्षमप्राधिकारिणः पक्षतः सम्पत्ति- कुक्षीकरण-आदेशस्य पुष्टेरनन्तरम् एषः चरणः गृहीतः। कार्यवाहीसमये पुलिस- अधीक्षकः संजीव यादवः, थानाप्रभारी च आशीष पठानिया इत्येतौ अन्यैः पुलिस-कर्मिभिश्च सह उपस्थिताः आसन्।

नूरपुर-पुलिस-अनुसारम्, कुक्षीकरण-आदेशस्य परिधिम् आगतासु सम्पत्तिषु आवासीयभवनं, घरेलूसामग्री, एका कारयानं च सन्ति। एतासां सर्वासां सम्पत्तीनां कुलमूल्यं १,०१,५५,७१८ रूप्यकाणि प्रोक्तम्। पुलिस-द्वारा सम्बद्धासु सम्पत्तिषु कुक्षीकरण-आदेशस्य सूचनां दात्री पट्टिका संस्थापिता। इयं कार्यवाही चिट्टा-तस्करी- प्रकरणे वैधानिक-प्रक्रियायाः अन्तर्गतं कृता अस्ति।

नशातस्कराणाम् आर्थिक-जालस्योपरि कार्यविधिः-

नूरपुर- पुलिस- प्रशासनस्य कथनमस्ति यत् नशातस्करैः अर्जितानाम् अवैध-सम्पत्तीनाम् उपरि वैधानिक-निग्रहणम् अभियानस्य मुख्यो भागः अस्ति। अस्य उद्देश्यं तस्कराणां आर्थिकजालं दुर्बलं कर्तुम् अवैध-व्यापारात् जायमानस्य लाभात् निबन्धनं च वर्तते।

चक्रवातीयवृष्टेः सम्भावनां दृष्ट्वा उत्तरप्रदेशे आपदाप्रबन्धनाय निर्देशाः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गोरखपुरम्। अतिवृष्टेः, झञ्झावातस्य च सम्भावनां दृष्ट्वा प्रशासनं सतर्कम्। उत्तरप्रदेशशासनस्य राहत आयुक्तकार्यालयेन निर्गतेन निर्देशपत्रेण बंगालस्य उपसागरे विकसितस्य चक्रवातीयमौसमतन्त्रस्य प्रभावात् अक्तूबरमासस्य २८ तथा २९ दिनाङ्कयोः उत्तरप्रदेशस्य अनेकभागेषु तीव्रवेगयुक्तानां वायूनां, मेघगर्जनया सह वज्रपातस्य तथा अतिवृष्टेः च सम्भावना व्यक्ता अस्ति।

भारतीय- मौसमविज्ञानविभागस्य आञ्चलिक-केन्द्रेण लखनऊतः २०२६ तमस्य वर्षस्य अक्तूबरमासस्य २३ दिनाङ्के निर्गतेन मौसमपूर्वानुमानेन एषा सम्भावना सूचिता अस्ति। सम्भावितप्रतिकूलमौसमस्य प्रभावं न्यूनतमं कर्तुं जनधनस्य सुरक्षां च सुनिश्चितुं सर्वेभ्यः सम्बन्धिताधिकारिभ्यः निम्नलिखितनिर्देशानां कठोरतया पालनं कर्तुं निर्देशः प्रदत्तः।

१. नियन्त्रणकक्षाणां सक्रियता

जनपदस्तरीयाः, तहसीलस्तरीयाः, विभागस्तरीयाश्च सर्वे आपदाप्रबन्धन- नियन्त्रणकक्षाः २४ होराः सक्रियाः स्थापनीयाः। सम्बन्धिताः उपजिलाधिकारीः, तहसीलदाराः, पुलिसविभागस्य, स्वास्थ्यविभागस्य, सिञ्चाईविभागस्य च अधिकारिणः सतर्काः स्थापनीयाः।

२. कृषकाणां कृते सस्यसुरक्षा

कृषिविभागस्य अधिकारिभिः कृषकाः जागरूकाः करणीयाः यत् क्षेत्रेषु परिपक्वाः, कटनोपयुक्ताश्च फसलाः शीघ्रं कर्तनीयाः। कटितधान्यानि खुले स्थाने न स्थापनीयानि। धान्यानि सुरक्षितस्थानेषु सञ्चेतव्यानि, आवश्यके सति तेषां संरक्षणाय समुचितव्यवस्था करणीया। अस्य विषये ग्रामेषु घोषणामाध्यमेन स्थानीयसञ्चारमाध्यमैश्च सूचना प्रसारणीया।

३. जीर्णभवनेभ्यः सुरक्षितस्थानेषु स्थानान्तरणम्

प्रत्येकं ग्रामपञ्चायते नगरीयनिकायेषु च जीर्णाणां, असुरक्षितानां च भवनानां शीघ्रं चिह्नीकरणं करणीयम्। तेषु निवसतां जनानां सूची निर्माय पुलिसस्य आपत्कालीनसेवायाः माध्यमेन तेषां सूचना प्रेषणीया। आवश्यकतानुसारं प्रभावितजनाः राहतशिविरेषु, सुरक्षितभवनेषु अथवा अन्येषु सुरक्षितस्थानेषु स्थानान्तरितव्याः।

४. जलप्लावनस्य निवारणाय पूर्वसिद्धता-

अतिवृष्टेः कारणेन जलमग्नतायाः सम्भावनायुक्तेषु क्षेत्रेषु पूर्वमेव आवश्यकव्यवस्था करणीया। जलनिकासमार्गाणाम् उपनदीनां च स्वच्छता सुनिश्चितव्या। जलप्लावनस्य सम्भावनायुक्तेषु स्थानेषु जलनिकासयन्त्राणि, अन्यानि आवश्यकसाधनानि च सज्जानि स्थापनीयानि।

५. सुचारुयातायातव्यवस्था-

अतिवृष्टेः कारणेन वृक्षाणां पतनेन यातायात-व्यवस्था बाधिता भवितुम् अर्हति। अतः आपत्कालीन- सेवादलानां नियुक्तिः आवश्यक-संसाधनैः सह पूर्वमेव करणीया, येन मार्गेषु पतितानां वृक्षाणां निष्कासनं शीघ्रं कर्तुं शक्यते तथा आवागमनं बाधारहितं भवेत्।

६. जनजागरूकता, पूर्वसचेतनाप्रचारः

ग्रामीणक्षेत्रेषु नगरीयक्षेत्रेषु च ढोलवादनेन, घोषणामाध्यमेन, स्थानीयसञ्चारमाध्यमैः, सामाजिकमाध्यमैश्च वज्रपातस्य, तीव्रवायुवेगस्य, अतिवृष्टेश्च सम्भावनां प्रति जनाः सावधानाः करणीयाः। आमजनाः 'सचेत' तथा 'दामिनी' इत्यनयोः अनुप्रयोगयोः अवतरणं कृत्वा निर्गतचेतावनीनां पालनाय प्रेरणीयाः।

७. सुरक्षात्मकसावधानताः

प्रतिकूलवातावरणे जनाः मुक्तमैदानेषु, जलाशयानां समीपे, जलप्लावितक्षेत्रेषु च गमनात् विरमन्तु। वृक्षाणामधः आश्रयः न स्वीकरणीयः। वज्रपातस्य सम्भावनायां सुरक्षितभवने आश्रयः ग्रहीतव्यः। अनावश्यकयात्रा परिहर्तव्या तथा आवागमनं नियन्त्रितं करणीयम्।

८. क्षतिमूल्याङ्कनं त्वरितराहतवितरणं च

कस्मिंश्चित् क्षेत्रे जनहानिः, पशुहानिः, भवनक्षतिः अथवा फसलक्षतिः भवति चेत्, तस्य तत्कालं मूल्याङ्कनं करणीयम्। राज्यस्य आपदामोचकनिधेः नियमानुसारं पीडितेभ्यः शीघ्रं राहतसहायतां प्रदातुं आवश्यककार्यवाही करणीया। निर्धारितप्रारूपेण सूचनाः सङ्कलयित्वा राहत आयुक्तकार्यालयाय शासनाय च समयेन प्रेषणीयाः।

सर्वेभ्यः अधिकारिभ्यः निर्देशः-

प्रशासनेन स्पष्टं निर्देशितं यत् बंगालस्य उपसागरे विकसितस्य चक्रवातीय-जलवायुतन्त्रस्य सम्भावितप्रभावं न्यूनकर्तुं जनधनस्य सुरक्षां सुनिश्चितुं च उपर्युक्तनिर्देशानां सर्वोच्चप्राथमिकतया पालनं करणीयम्। राहतकार्याणां पूर्वतयारी, आवश्यकसंसाधनानां व्यवस्था, आपत्कालीन-सेवानां सज्जता च समयेन सुनिश्चितव्या।

- जयप्रकाशः
अपरजिलाधिकारी (वित्त एवं राजस्व) / प्रभारी अधिकारी (आपदा), गोरखपुरम्



हिमसंस्कृतवार्ताः

करकचतुर्थ्यां रात्रौ ८ वादनसमये १७ निमेषेषु चन्द्रोदयः सम्भाव्यते

२९ अक्टोबर्-दिनाङ्के सौभाग्यवत्तीनां पवित्रं व्रतम्, सायं ५:३८ तः ६:५६ पर्यन्तं पूजायाः शुभमुहूर्तः

करकचतुर्थी-व्रतं विवाहितानां महिलानां कृते विशेषं धार्मिकं श्रद्धापर्व मन्यते। अस्मिन् दिने विवाहिताः महिलाः स्वपतीनां दीर्घायुः, सुखसमृद्धिः तथा दाम्पत्यजीवनस्य सौख्यं कामयित्वा निर्जलोपवासं कुर्वन्ति। दिवसभरं व्रतं कृत्वा रात्रौ चन्द्रमसः दर्शनं कृत्वा तस्मै अर्घ्यं प्रदाय व्रतस्य पारणं कुर्वन्ति। अस्मिन् वर्षे करवाचतुर्थी-पवित्रपर्व २९ अक्टोबर् २०२६ दिनाङ्के आचरिष्यते।

करकचतुर्थ्यां महिलाः विधिविधानपूर्वकं करवामातुः, भगवान् शिवस्य, माता पार्वत्याः, भगवान् गणेशस्य तथा भगवान् कार्तिकेयस्य पूजनं कुर्वन्ति। सायंकाले महिलाः एकत्र समागत्य करवाचतुर्थी-व्रतकथां शृण्वन्ति। पूजां समाप्य चन्द्रोदयस्य प्रतीक्षां कुर्वन्ति।

सायं ५:३८ तः ६:५६ पर्यन्तं पूजायाः शुभमुहूर्तः

ज्योतिषाचार्यः चन्द्रशर्मा इत्यनेन उक्तं यत् पञ्चाङ्गानुसारं कार्तिकमासस्य कृष्णपक्षस्य चतुर्थीतिथिः २९ अक्टोबर्-दिने मध्यरात्रौ १ वादनात् प्रारभ्यते। चतुर्थीतिथेः समाप्तिः तु २९ अक्टोबर्-दिनस्य रात्रौ १० वादनसमये ९ निमेषेषु भविष्यति।करवाचतुर्थी-पूजनस्य शुभमुहूर्तः सायं ५ वादनतः ३८ निमेषेभ्यः आरभ्य ६ वादनतः ५६ निमेषपर्यन्तं भविष्यति। तेन उक्तं यत् करवाचतुर्थी-दिने व्रतस्य कालः प्रातः ६ वादनतः ३१ निमेषेभ्यः आरभ्य रात्रौ ८ वादनतः १७ निमेषपर्यन्तं भविष्यति। व्रतधारिण्यः महिलाः अस्मिन् काले निर्जलोपवासं करिष्यन्ति तथा चन्द्रदर्शनानन्तरं व्रतस्य पारणं करिष्यन्ति।

रात्रौ ८ वादनतः १७ निमेषे चन्द्रोदयस्य सम्भावना

करवाचतुर्थी-व्रते चन्द्रदर्शनस्य विशेषं महत्त्वं वर्तते। धार्मिकमान्यतानुसारं चन्द्रमसे अर्घ्यं प्रदाय तस्य दर्शनं कृत्वा एव व्रतस्य पारणं क्रियते। अस्मिन् वर्षे २९ अक्टोबर्-दिने रात्रौ ८ वादनतः १७ निमेषे चन्द्रोदयः सम्भाव्यते। तथापि विभिन्नेषु नगरेषु स्थानेषु च चन्द्रोदयस्य समये किञ्चित् भेदः भवितुमर्हति।महिलाः चन्द्रमसः दर्शनानन्तरं चलनीद्वारा चन्द्रमसं दृष्ट्वा तस्मै अर्घ्यं प्रदास्यन्ति तथा पतिभ्यः हस्तात् जलं स्वीकृत्य व्रतस्य पारणं करिष्यन्ति।

करवाचतुर्थ्यां न भविष्यति भद्रायाः प्रभावः

ज्योतिषाचार्यस्य चन्द्रशर्मणः अनुसारं भद्राकालः २८ अक्टोबर्-दिने प्रातः ५ वादनतः ३१ निमेषेभ्यः आरभ्य २९ अक्टोबर्-दिने प्रातः ४ वादनतः २७ निमेषपर्यन्तं भविष्यति। अतः करवाचतुर्थ्यां निर्धारिते पूजाशुभमुहूर्ते भद्रायाः किमपि प्रभावः न भविष्यति। भद्रायाः समाप्तेः अनन्तरं व्रतधारिण्यः महिलाः सर्गीं स्वीकर्तुं शक्नुवन्ति।करवाचतुर्थी-पर्वणः विषये सुहागिनीनां महिलानां मध्ये विशेषः उत्साहः दृश्यते। महिलाः व्रतस्य सिद्धताभिः सह पूजासामग्रीं, करवं, शृङ्गारसामग्रीं तथा अन्यानि आवश्यकवस्तूनि क्रेतुं व्यस्ताः सन्ति। विपणिषु अपि करवाचतुर्थी-पर्वणः कारणेन सम्वर्दः वर्धमानः अस्ति।

दिल्ली पब्लिक विद्यालयः, वाराणसी स्पिक मैके इत्यस्य तत्त्वावधाने गोटीपुआ- ओडिसी- नृत्यस्य मनोहारिणी प्रस्तुतिः





▪भारतीय- शास्त्रीय- कलायाः सांस्कृतिक- वैभवस्य च अद्भुतः सङ्गमः; छात्राणां कृते अविस्मरणीयः सांस्कृतिकानुभवः।

हिमसंस्कृतवार्ताः- वाराणसी, २७ अक्तूबर २०२६। वाराणसीस्थे दिल्ली पब्लिक विद्यालये अद्य दिनाङ्के २७ अक्तूबर २०२६ तमे दिने विद्यालयस्य सभागारे SPIC MACAY इति संस्थायाः तत्त्वावधाने भारतीय- शास्त्रीय- नृत्यकलायै भारतीयसंस्कृतेः गौरवशालिन्यै परम्परायै च समर्पितः एकः विशेषः सांस्कृतिककार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे ओडिशाराज्यस्य प्रसिद्धयोः गोटीपुआ- नृत्यस्य ओडिसी-नृत्यस्य च मनोहारिणी प्रस्तुति विद्यार्थिनां मनांसि विशेषतया आकर्षितवती।

SPIC MACAY इति संस्थायाः प्रमुखम् उद्देश्यम् अस्ति यत् भारतीयसंस्कृतेः विविधपक्षेषु जागरूकतां वर्धयित्वा भारतीयकलासु निहितानां जीवनमूल्यानां संरक्षणाय युवपीढीं प्रेरयेत् तथा औपचारिकशिक्षायाः गुणवत्तां समृद्धां कुर्यात्। अस्याः संस्थायाः माध्यमेन विद्यार्थिनः भारतीयकलानां सांस्कृतिकपरम्पराणां च सान्निध्यं प्राप्नुवन्ति, येन तेषु अनुशासनस्य, समर्पणस्य, संवेदनशीलतायाः, सांस्कृतिकगौरवस्य च भावनाः विकसिताः भवन्ति। अस्यैव महान् उद्देश्यम् अग्रे स्थापयित्वा विद्यालये अयं सांस्कृतिककार्यक्रमः आयोजितः।

दीपप्रज्वलनेन अतिथिसत्कारश्च कार्यक्रमस्य शुभारम्भः

कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन अभवत्। अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्या मुनमुनसेन गुप्ता महोदया स्मृतिचिह्नप्रदानेन सम्माननीयान् अतिथीन् सत्कृतवती। छात्राभिः तिलकधारणेन पुष्पमालाप्रदानेन च कलाकाराणां हार्दिकं स्वागतं कृतम्।तदनन्तरं दशभुजा गोटीपुआ ओडिसी नृत्यपरिषदः समूहप्रमुखं मर्दलवादकं च श्रीबटकृष्णदासमहोदयं तथा तस्य सहकलाकारान् विद्यालयपरिवारेण सादरं सम्मानितम्।

गोटीपुआ-ओडिसी-नृत्ययोः अद्भुतं कलाप्रदर्शनम्

अद्यतनस्य कार्यक्रमस्य प्रमुखम् आकर्षणम् आसीत् ओडिशाराज्यस्य समृद्धया सांस्कृतिकपरम्परया सम्बद्धयोः गोटीपुआ-ओडिसी-नृत्ययोः मनोहारिणी प्रस्तुति। अस्मिन् कार्यक्रमे बटकृष्णदासः (समूहप्रमुखः, मर्दलवादकश्च), भगवान् बेहरा (गायकः), कबिराज प्रधानः (वंशीवादकः), नीलकण्ठ नायकः (मञ्जीरावादकः), अन्ये नृत्यकलाकाराः स्वकीयया कलासाधनया, लयबद्धतया, भावाभिव्यक्त्या च उपस्थितान् सर्वान् दर्शकान् मुग्धान् अकुर्वन्।कलाकारैः लयस्य, तालस्य, मुद्राणाम्, भावभङ्गिमानां, शारीरिकसन्तुलनस्य, भक्तिभावस्य च सुन्दरः समन्वयः प्रस्तुतः। तेषां नृत्यप्रदर्शने भारतीय-शास्त्रीय-नृत्यस्य समृद्धा परम्परा सजीवरूपेण प्रतिबिम्बिता।प्रत्येकं नृत्यपदम्, प्रत्येकः भावः, प्रत्येकं हस्तमुद्राप्रदर्शनं च भारतीयसंस्कृतेः गौरवम् उद्घोषयति स्म। कलाकाराणाम् अनुपमया प्रस्तुत्या सम्पूर्णं सभागारं विस्मयेन, आनन्देन, करतलध्वनिभिश्च मुखरितम् अभवत्।

कलापरम्परायाः गौरवशाली यात्रा

स्वसम्बोधने समूहप्रमुखः बटकृष्णदासमहोदयः गोटीपुआ- ओडिसी- नृत्ययोः ऐतिहासिकं महत्त्वं, वैशिष्ट्यं, सांस्कृतिकं गौरवं च विद्यार्थिभ्यः अवबोधितवान्। सः पद्मश्रीसम्मानितस्य प्रसिद्धस्य नृत्यगुरोः मगुनीदासमहोदयस्य पौत्रः अस्ति। सः स्वकीयया कलासाधनया, नृत्यपरम्परायाः संरक्षणेन ओडिशायाः अमूल्यां सांस्कृतिकधरोहरां भाविपीढीभ्यः सम्प्रेषयितुं महत्त्वपूर्णं योगदानं ददाति।तस्य वक्तव्येन विद्यार्थिनः अवगतवन्तः यत् भारतीयशास्त्रीयनृत्यं केवलं मनोरञ्जनस्य साधनं नास्ति, अपि तु भारतीयजीवनमूल्यानां, भक्तेः, साधनायाः, अनुशासनस्य, आध्यात्मिकचेतनायाश्च सशक्तं अस्ति।

माध्यमम्

जिज्ञासानां समाधानम्, ज्ञानस्य संवर्धनम्

नृत्यप्रस्तुतेः अनन्तरं विद्यार्थिनः बटकृष्णदासमहोदयेन सह संवादस्य अवसरं प्राप्तवन्तः। विद्यार्थिभिः नृत्यकलायाः स्वरूपेण, प्रशिक्षणप्रक्रियया, कलाकाराणां साधनया, गोटीपुआ- ओडिसी- नृत्ययोः विशेषताभिः च सम्बद्धाः विविधाः जिज्ञासापूर्णाः प्रश्नाः पृष्टाः।बटकृष्णदासमहोदयः सरलतया, सप्रमाणं च तेषां प्रश्नानाम् उत्तराणि दत्तवान्। तस्य उत्तरैः विद्यार्थिनः सन्तुष्टाः, उत्साहिताः, भारतीयकलासु अधिकं ज्ञातुम् अभिलाषिणश्च अभवन्। एवं कार्यक्रमः विद्यार्थिनां कृते केवलं नृत्यदर्शनस्य अवसरः न भूत्वा प्रत्यक्षानुभवाधारितस्य ज्ञानस्य, जिज्ञासायाः, सृजनशीलतायाः, सांस्कृतिकचेतनायाश्च संवर्धनस्य माध्यमम् अपि अभवत्।

कार्यक्रमस्य कुशलं सञ्चालनम्

अस्य सम्पूर्णस्य सांस्कृतिककार्यक्रमस्य सफलं, सुव्यवस्थितं, प्रभावपूर्णं च सञ्चालनं विद्यालयस्य हिन्दीविभागस्य शिक्षिका डॉ. नीलू दीक्षित-महोदयायाः कुशलमार्गदर्शने सम्पन्नम्।

तस्याः कुशलयोजना, प्रभावशालिनी प्रस्तुति, समन्वयक्षमता च कार्यक्रमस्य गरिमाम् अवर्धयन्। तस्याः मार्गदर्शने छात्रैः मानस यादवेन, अभिनन्दन तिवारिणा, आइशी सिंहया च कार्यक्रमस्य विभिन्नाः गतिविधयः सुचारुरूपेण सञ्चालिताः।

छात्राणां प्रभावपूर्णेन प्रस्तुतीकरणेन कार्यक्रमस्य प्रत्येकः चरणः सुव्यवस्थितरूपेण सम्पन्नः। डॉ. नीलू दीक्षितमहोदयायाः मार्गदर्शनं तथा छात्राणां समन्वितप्रयत्नः कार्यक्रमस्य सफलतायां महत्त्वपूर्णं योगदानम् अददाताम्। सर्वेषां सहयोगेन अयं सांस्कृतिकसमारोहः सफलतया सम्पन्नः तथा विद्यार्थिनां कृते अविस्मरणीयः अनुभवः अभवत्।

विद्यालयस्य समग्रविकासदृष्टिः

दिल्ली- पब्लिक- विद्यालयः, वाराणसी सदैव विद्यार्थिनां सर्वाङ्गीणविकासाय प्रतिबद्धः अस्ति। विद्यालयस्य उद्देश्यम् अस्ति यत् विद्यार्थिनः आधुनिकशिक्षया सह भारतीयसंस्कृतेः, परम्परायाः, नैतिकमूल्यानां च गभीरम् अवबोधनं प्राप्नुयुः।

अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्या मुनमुनसेनगुप्ता महोदया, समर्पणविङ्गस्य समन्वयिका किरणशर्मा महोदया, गतिविधि-संयोजिका काकुली मुखर्जी महोदया, विद्यालयस्य वरिष्ठपदाधिकारिणः, शिक्षकगणाः तथा अन्ये गणमान्यजनाः उपस्थिताः आसन्।

विद्यालयपरिवारेण SPIC MACAY-संस्थायै, दशभुजा गोटीपुआ ओडिसी नृत्यपरिषदः सर्वेभ्यः कलाकारिभ्यः, आयोजकेभ्यः, सहयोगिभ्यश्च हार्दिकः कृतज्ञताभावः व्यक्तः।

उत्तरप्रदेशे निःशुल्कान्नवितरणव्यवस्थायाः निरीक्षणाय अष्टादश मण्डलेषु विशेषदलानि गठितानि

अनियमिततायां संलग्नानां विक्रेतॄणां विरुद्धं कठोरकार्याचरणं भविष्यति

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य खाद्य- रसदविभागेन सार्वजनिक- वितरणव्यवस्थायाः पारदर्शितां सुनिश्चितं कर्तुं निःशुल्कान्न- वितरणकार्यक्रमस्य निरीक्षणार्थम् अष्टादशमण्डलेषु विशेषनिरीक्षणदलानि गठितानि। असम्बद्धानां, पात्रगृहस्थ- राशनपत्रधारकाणां कृते निर्धारितमात्रायां खाद्यान्नवितरणं भवति न वा, इत्यस्य परीक्षणं दलैः क्रियते।

खाद्य-रसदविभागस्य आयुक्तेन अनिलकुमारेण २०२६ तमस्य वर्षस्य अक्तूबरमासस्य २६ दिनाङ्के निर्गते कार्यालयादेशे उक्तं यत् राष्ट्रिय- खाद्य-सुरक्षा- अधिनियमः- २०१३ इत्यस्य अन्तर्गतं प्रदेशे अन्त्योदय- राशनपत्रधारकेभ्यः प्रतिकार्डं ३५ किलोग्राम खाद्यान्नं, पात्रगृहस्थ- राशनपत्रधारकेभ्यः सम्बद्ध- प्रत्येकैककुटुम्बघटकाय पञ्च किलोग्राम खाद्यान्नं निःशुल्कं वितरितुं निर्देशः प्रदत्तः अस्ति। विभागीयविवरणानुसारं प्रदेशे ४०,८३,५०६ अन्त्योदय- राशनपत्राणि, ३,२६,९०,९४८ पात्रगृहस्थ- राशनपत्राणि सन्ति। एतेषां माध्यमेन ३,६७,७४,४५४ राशनपत्रधारकेभ्यः खाद्यान्नवितरणं क्रियते। एतदर्थं पूर्वनिर्गतयोः आदेशयोः क्रमाङ्कः ४३५२, दिनाङ्कः ०६ अक्तूबर २०२६, ४६७१, दिनाङ्कः २३ अक्तूबर २०२६ इत्यनुसारम् अक्तूबर-मासस्य ३० दिनाङ्कपर्यन्तं निःशुल्क- खाद्यान्न-वितरणस्य निर्देशाः प्रदत्ताः सन्ति।

खाद्यान्नवितरणे अनियमिततायाः आक्षेपाः-

मुख्यालयस्तरे प्राप्तशिकायतानुसारं कतिपयजनपदेषु केचन उचितमूल्यविक्रेतारः अन्त्योदय- राशनपत्रधारकेभ्यः, पात्रगृहस्थ-राशनपत्रधारकेभ्यः निर्धारितमात्रायां खाद्यान्नं न वितरन्ति। केचन विक्रेतारः खाद्यान्नस्य दुरुपयोगं कुर्वन्ति इत्यपि आरोपाः प्राप्ताः। एतादृशी स्थितिः गम्भीरा तथा अनुचितेति मन्यमानः विभागः सम्बन्धितविक्रेतॄणां परीक्षणं कृत्वा आवश्यक-दण्डात्मककार्यवाही कर्तुं निर्देशं दत्तवान्।

अष्टादश मण्डलेषु निरीक्षणदलानि नियुक्तानि

निर्देशानुसारम् अपरायुक्तानां, संयुक्तायुक्तानाम्, उपायुक्तानां खाद्यविभागीयाधिकारिणां नेतृत्वे विभिन्नमण्डलेषु निरीक्षणकार्यं भविष्यति। प्रत्येकस्मिन् आवण्टितमण्डले मण्डलायुक्तेन चिह्नितस्य जनपदस्य पञ्च उचितमूल्यविक्रेतारः यादृच्छिकपद्धत्या चयनिताः भविष्यन्ति। तेषां विक्रयकेन्द्रेषु खाद्यान्नवितरणस्य परीक्षणं क्रियते।

निरीक्षणस्य दायित्वं निम्नलिखित-मण्डलेषु समर्पितम् अस्ति-

१. अयोध्यामण्डलस्य उपायुक्तः- गोरखपुरमण्डले निरीक्षणं करिष्यति।
२. अलीगढमण्डलस्य उपायुक्तः- आगरामण्डले निरीक्षणं करिष्यति।
३. आगरामण्डलस्य अपरायुक्तः/ प्रभारी उपायुक्तः- झाँसीमण्डले निरीक्षणं करिष्यति।
४. आजमगढमण्डलस्य अपरायुक्तः/प्रभारी उपायुक्तः- वाराणसीमण्डले निरीक्षणं करिष्यति।
५. कानपुरमण्डलस्य संयुक्तायुक्तः- प्रयागराजमण्डले निरीक्षणं करिष्यति।
६. गोरखपुरमण्डलस्य संयुक्तायुक्तः- देवीपाटनमण्डले निरीक्षणं करिष्यति।
७. चित्रकूटधाममण्डलस्य अपरायुक्तः/ प्रभारी उपायुक्तः- अलीगढमण्डले निरीक्षणं करिष्यति।
८. झाँसीमण्डलस्य उपायुक्तः- चित्रकूटधाममण्डले निरीक्षणं करिष्यति।
९. देवीपाटनमण्डलस्य उपायुक्तः- बस्तीमण्डले निरीक्षणं करिष्यति।
१०. प्रयागराजमण्डलस्य संयुक्तायुक्तः- आजमगढमण्डले निरीक्षणं करिष्यति।
११. बरेलीमण्डलस्य उपायुक्तः- मुरादाबादमण्डले निरीक्षणं करिष्यति।
१२. बस्तीमण्डलस्य अपरायुक्तः/ प्रभारी उपायुक्तः- अयोध्यामण्डले निरीक्षणं करिष्यति।
१३. मेरठमण्डलस्य संयुक्तायुक्तः- सहारनपुरमण्डले निरीक्षणं करिष्यति।
१४. मुरादाबादमण्डलस्य अपरायुक्तः/ प्रभारी उपायुक्तः- मेरठमण्डले निरीक्षणं करिष्यति।
१५. मिर्जापुरमण्डलस्य अपरायुक्तः/ प्रभारी उपायुक्तः- लखनऊमण्डले निरीक्षणं करिष्यति।
१६. लखनऊमण्डलस्य संयुक्तायुक्तः- कानपुरमण्डले निरीक्षणं करिष्यति।
१७. वाराणसीमण्डलस्य उपायुक्तः- मिर्जापुरमण्डले निरीक्षणं करिष्यति।
१८. सहारनपुरमण्डलस्य अपरायुक्तः/प्रभारी उपायुक्तः- बरेलीमण्डले निरीक्षणं करिष्यति।

अष्टसु प्रमुखबिन्दुषु परीक्षणम्

निरीक्षणदलेन निम्नलिखितानां विषयाणां परीक्षणं करणीयम्-

१. खाद्यान्नवितरणात् पूर्वं नोडलाधिकारिणः उपस्थितौ आवश्यकवस्तूनां भौतिकसत्यापनं भवति न वा।
२. उचितमूल्यविक्रयकेन्द्रेषु वितरणसमये नामितनोडलाधिकारी पर्यवेक्षणार्थम् उपस्थितः भवति न वा।
३. नोडलाधिकारिणः उपस्थितौ खाद्यान्नवितरणं क्रियते न वा।
४. अन्त्योदय-राशनपत्रधारकेभ्यः प्रतिकार्डं ३५ किलोग्राम, पात्रगृहस्थ- राशनपत्रसम्बद्धेषु प्रत्येक-कुटुम्बघटकेषु च पञ्च किलोग्राम खाद्यान्नं निर्धारितमात्रया निःशुल्कं दीयते न वा।
५. ई-पॉस-यन्त्रस्य माध्यमेन खाद्यान्नवितरणं सुचारुरूपेण भवति न वा।
६. ई-पॉस-यन्त्रात् निर्गतासु वितरणपर्चिकासु गोधूमस्य तण्डुलस्य च मूल्यं शून्यमिति स्पष्टतया प्रदर्शितं भवति न वा।
७. उचितमूल्यविक्रेतृभिः घटतौली क्रियते न वा।
८. राशनविक्रयकेन्द्रस्य भौतिकसत्यापनस्य अभिलेखेषु तथा वास्तविकस्थितौ अन्तरं विद्यते न वा।







दोषिणां विरुद्धं कठोरकार्याचरणम्

आदेशे स्पष्टतया उक्तं यत् निरीक्षणे अनियमितता प्रमाणिता चेत् सम्बन्धितोचितमूल्यविक्रेतुः विरुद्धं प्रथमसूचनापत्रं, निलम्बनम् अथवा प्रतिमूर्ति-कार्यवाहीसहितं नियमानुसारं कठोरकार्यवाही प्रस्तावित भविष्यति। निरीक्षणस्य सम्पूर्णविवरणं निर्धारितप्रारूपेण गूगल-पत्रके सङ्कलयित्वा अधिकतमम् एकसप्ताहाभ्यन्तरे विभागीय-कार्यालयाय प्रेषणीयम्।

आयुक्तेन प्रकरणस्य गाम्भीर्यं दृष्ट्वा सर्वेषां सम्बन्धिताधिकारिणां व्यक्तिगतं ध्यानम् अपेक्षितम् इति निर्देशः प्रदत्तः। अस्य निरीक्षणाभियानस्य मुख्योद्देश्यं पात्रलाभार्थिभ्यः निर्धारितमात्रायां निःशुल्कखाद्यान्नस्य उपलब्धतां सुनिश्चित्य सार्वजनिक- वितरणव्यवस्थायां पारदर्शितां उत्तरदायित्वं च वर्धयितुम् अस्ति।

मधुर-सांस्कृतिक-प्रस्तुतिभिः मिथिला-सांस्कृतिक-परिषदा कोजागरा-महोत्सवः समुल्लासेन समायोजितः



बोकारो। मिथिला-मैथिलानां प्रतिष्ठिता संस्था मिथिला-सांस्कृतिक-परिषत्, बोकारो इत्यनया रविवासरे सायंकाले मिथिलाञ्चलस्य पारम्परिकः कोजागरा-महोत्सवः सोल्लासं समायोजितः। परिषदा सञ्चालितस्य सेक्टर-४ई-स्थितस्य मिथिला-एकेडमी-पब्लिक-विद्यालयस्य विद्यापति-सभागारे आयोजितेऽस्मिन् महोत्सवे गीत-सङ्गीतयोः मधुरिम्णा मिथिलायाः समृद्धायाः सांस्कृतिकपरम्परायाः मनोहारिणी झलक् प्रदर्शिता।

कार्यक्रमस्य उद्घाटनं परिषदोः उपाध्यक्षेन श्रवणकुमारझा-महोदयेन, महासचिवेन नीरजचौधरी-महोदयेन, मिथिला-एकेडमी-पब्लिक-विद्यालयस्य अध्यक्षेन तथा परिषदः निदेशक-मण्डलस्य संयोजकेन राजेन्द्रकुमार-महोदयेन, विद्यालयस्य उपाध्यक्षेन बटोहीकुँवर-महोदयेन, सचिवेन दिलीपकुमारझा-महोदयेन, संयुक्तसचिवेन सुनीलमोहनठाकुर-महोदयेन, मिथिला-महिला-समितेः अध्यक्षया पूनममिश्रा-महोदयया, परिषदः वित्तसचिवेन मिहिरमोहनठाकुर-महोदयेन तथा सांस्कृतिककार्यक्रमनिदेशकेन अरुणपाठक-महोदयेन संयुक्तरूपेण कृतम्।स्वागतभाषणे महासचिवः नीरजचौधरी-महोदयः कोजागरा-महोत्सवस्य महत्त्वं विवृण्वन् अवदत् यत् मिथिलाञ्चले आश्विनमासस्य पूर्णिमायां कोजागरा-पर्व आचर्यते। अस्मिन् दिने प्रतिगृहे लक्ष्मीपूजनस्य परम्परा वर्तते तथा रात्रिजागरणस्य विशेषं महत्त्वम् अस्ति। विशेषतः नवविवाहितवराणां गृहेषु अयं महोत्सवः महता वैभवेन हर्षोल्लासेन च आयोज्यते। सः मिथिलायाः समृद्धायाः संस्कृतेः परम्पराणां च संरक्षणाय संवर्धनाय च सर्वान् आहूतवान्।सांस्कृतिककार्यक्रमस्य शुभारम्भः अरुणपाठक-महोदयस्य 'जय जय भैरवि असुरभयाउनि...' इति भगवती-वन्दनया अभवत्। अनन्तरं तेन 'आइ पूर्णिमा उगल इजोरिया, चकमक चमकै चान यौ, मिथिलाके पावनि ई कोजगरा, बाँटू पान-मखान यौ...' तथा 'तोरा आँचर सं बहके पवन...' इत्यादीनां मैथिलीगीतानां मधुरप्रस्तुतिभिः श्रोतारः मन्त्रमुग्धाः कृताः।आञ्चलपाठक-महोदयया 'भैया कोजगरामे भारक मोजगरामे, बाबूजी बाँटथि मखान...', 'गोल-मोल सं चाँद गगन में...' इति कोजागरा-गीतयोः तथा 'जगदम्ब अहीं अवलम्ब हमर हे माय, अहाँ बिनु आस ककर...' इति भगवती-वन्दनायाः सुमधुरं गायनं कृत्वा उपस्थितानां मनांसि आनन्देन आपूरितानि। अस्मिन् कार्यक्रमे उमेशकुमारझा-महोदयः कीबोर्डवाद्येन हर्षितझा-महोदयः च तबलावादनेन सुमधुरां सङ्गतिं कृतवन्तौ।कार्यक्रमस्य कुशलं सञ्चालनं परिषदः सांस्कृतिककार्यक्रमनिदेशकः अरुणपाठक-महोदयः अकरोत्। धन्यवादज्ञापनं मिथिला-एकेडमी-विद्यालयस्य संयुक्तसचिवः सुनीलमोहनठाकुर-महोदयः कृतवान्।महोत्सवस्य सफलायोजने रवीन्द्रझा, सुमितकुमारझा, विश्वनाथझा तथा गोविन्दकुमारझा-महोदयानां महत्त्वपूर्णं योगदानम् आसीत्।

अस्मिन् अवसरे परिषदः निदेशक-मण्डलस्य सदस्यौ कृष्णचन्द्रझा-विजयकुमारझा-महोदयौ, विजयशङ्करमल्लिकः, सुधापतिः, मिहिरकुमारझा 'राजू', अविनाशझा 'अवि', डॉ. यू. सी. झी, विनयदरिहरे, शम्भूझा, श्रीमोहनझा, शैलेन्द्रकुमारमिश्रः, सुदीपकुमारठाकुरः, बी. एन. ठाकुरः, ए. के. मिश्रः, डी. सी. मिश्रा, मीरामिश्रा, पूनमझा, कालीकान्तमिश्रः, सोनीपाठकः, अरविन्दमिश्रः, पशुपतिझा, एस. के. झा, राजीवकण्ठः, गङ्गेशकुमारपाठकः, एस. के. सिंहः, गणेशझा, विजयकुमारमिश्रः, कन्हैयाझा, भृगुनन्दनठाकुरः, ऋषिकेशचौधरी, अमरजीतचौधरी इत्यादयः गणमान्याः व्यक्तयः तथा शतशः जनाः उपस्थिताः आसन्।अयं महोत्सवः मैथिल-संस्कृतेः, लोकगीतानां, पारम्परिकाचाराणां च संरक्षणे संवर्धने च महत्त्वपूर्णां भूमिकां निर्वहन् सांस्कृतिकैक्यस्य सौहार्दस्य च सन्देशं प्रसारितवान्

"संस्कृतकथामञ्जरी" {३८} (२) ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।। "अथ पुत्तलिका-शापमोचनं नाम द्वात्रिंशोपाख्यानम्"

एकदा परमप्रेम्णा विलासेन च अन्योऽनम् ईक्षमाणौ विहारमन्दिरस्थौ शङ्करो दुर्बुद्धिवशात् नारीजन- सुलभकौतुकाभिः अस्माभिः दृष्टौ। तत् दृष्ट्वा देवी पार्वती सकोपमस्मान् अशपत्- भवत्यो निर्जीवाः पुत्तलिका भूत्वा इन्द्रस्य सिंहासने लगन्तु। तोऽस्माभिश्च सप्रणिपातं शापावसानं याचितम्। अथ सा देवी समवदत्- यदा तत् सिंहासनं विक्रमेण अधिष्ठितं भूत्वा पुनः भोजस्य हस्तगतं भविष्यति, यदा च विक्रमचरितं भोजराजा युष्मत् श्रोष्यति तदैव शापावसानं भविष्यति इति। सुचिरकालादनन्तरम् अद्यभवत्प्रसादात् वयं पार्वतीश्वरणौ दृष्ट्वा मोदिष्यामः। त्वमपि एत्सिंहासनस्योपरि देवालयं कारयित्वा, तत्र अष्टदले उमा-महेश्वरमूर्तिं प्रतिष्ठाप्य, प्रतिदिनं षोड्शोपचारैः पूजां कारयतु, वर्णाश्रमधर्म्मनिरतान् लोकांश्च परिपालयन् उर्वीं [पृथिवीम्] भुनक्तु, तेन तौ तवोपरि प्रसन्नौ भूत्वा सर्वाभिष्टं पूरयिष्यतः इति।

डा. वर्षा प्रकाश टोणगांवकर ©®
पुणे, महाराष्ट्रम्



52th AIOC - हरिद्वारे प्राच्यविद्यायाः महाकुम्भः पतंजलिविश्वविद्यालये आयोज्यते ५२ तमम्

अखिलभारतीयप्राच्यविद्यासम्मेलनम् - डॉ रेणुका बोकारे



हिमसंस्कृतवार्ता- डॉ मनोजशैलः ।

संस्कृतजगतः ज्ञानानुसन्धानस्य च महाकुम्भरूपेण प्रसिद्धं द्विपञ्चाशत्तमम् 'अखिलभारतीय-प्राच्यविद्या-सम्मेलनम्' (All India Oriental Conference - AIOC) आगमिने अक्टोबर्-मासस्य एकोनत्रिंशत् (२९) दिनाङ्कात् हरिद्वारस्थे पतञ्जलि-विश्वविद्यालये समारप्स्यते। एतस्य त्रिदिवसीयस्य ऐतिहासिकस्य सम्मेलनस्य आयोजनं पतञ्जलि-विश्वविद्यालयः, नवदेहलीस्थः केन्द्रीय-संस्कृत-विश्वविद्यालयः तथा च अखिलभारतीय-विद्वत्परिषद् इत्येतेषां संयुक्ततत्त्वावधाने संजायते। अस्मिन् अधिवेशने केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. श्रीनिवास-वरखेडी-महोदयाः अध्यक्षपदम् अलङ्करिष्यन्ति। तथैव प्रो. कविता-होले महोदया प्रधानसचिवरूपेण, प्रो.(डॉ) साध्वी देवप्रिया महोदया च स्थानियसचिवरूपेण दायित्वं निर्वक्ष्यन्ति।

उल्लेखनीयमस्ति यत् अखिलभारतीय-प्राच्यविद्या-सम्मेलनं विगत-सप्तोत्तरशत-वर्षेभ्यः (१०७ वर्षेभ्यः) प्राच्यविद्यायाः, संस्कृतस्य, दर्शनस्य, पुरातत्त्वस्य च विकासाय सततं प्रयतमानम् अस्ति। अस्मिन् सम्मेलने देश-विदेशेभ्यः सहस्राधिकाः विद्वांसः, शोधच्छात्राः, आचार्याश्च समागत्य विभिन्नविषयेषु स्वशोधपत्राणि प्रस्तोष्यन्ति। अस्मिन् आयोजने भारतीयज्ञानपरम्परायाः आधुनिकसन्दर्भे उपादेयताविषये अपि गम्भीरा चर्चा भविष्यति। ५२ तमस्य अखिलभारतीयप्राच्यविद्यासम्मेलनस्य माध्यम-समन्वयिका डॉ रेणुका बोकारे अवदत् यत् हरिद्वारनगरी अस्मिन् अवसरे ज्ञानपिपासूनां विदुषां च समागमेन पुनरेकवारं ज्ञानतीर्थत्वेन भासिष्यते। एतत् ५२-तमम् अखिलभारतीय-प्राच्यविद्या-सम्मेलनं न केवलं प्राचीनपाण्डित्यस्य उत्सवः, अपि तु आधुनिक-प्रत्यह्वानानां समाधानाय भारतीयशास्त्रदृष्ट्या मार्गदर्शकं भविष्यति।



वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। मया एका आश्चर्यकरी वार्ता पठिता। अमेरिका-देशस्य अभियन्तृभिः एकम् उष्णता-गोपकं वस्त्रं निर्मितम्। तेन वस्त्रेण उष्णता- चित्रग्राहियन्त्रेभ्यः वस्तूनि अदृश्यानि कृतानि।

नन्दिनी- अहो, उष्णतायाः गोपनम् अतीव विस्मयकरं जातम्! मया अपि अन्या वार्ता श्रुता। आङ्ग्लदेशे वैज्ञानिकैः प्राचीन-रोमन-काचस्य रहस्यं ज्ञातम्। तैः तस्मिन् काचे सूक्ष्मसुवर्ण-कणाः दृष्टाः। यैः प्रकाशे काचस्य वर्णः परिवर्तितः।

काव्या- प्राचीनानां ज्ञानं खलु अद्भुतं सिद्धम्! चीनदेशे अपि एका विचित्रा घटना सञ्जाता। तत्र एकेन नरेण जल-द्विचक्रिकया जले एव पञ्चविंशति-मील-मिता दूरता क्रान्ता।

नन्दिनी- जलस्य उपरि यात्रा अतीव कौतुकावहा जाता! अन्ते, अमेरिकादेशे एकस्य विचित्र-छत्राकस्य अध्ययनं वैज्ञानिकैः कृतम्। तस्य खादनेन जनैः लघ्वाकाराः मानवाः दृष्टाः। परन्तु तस्मिन् छत्राके किमपि ज्ञातं मादकद्रव्यं न प्राप्तम्।



वित्तवर्षस्य २०२६-२७ प्रथमत्रैमासिके भारतस्य 'जीडीपी' (सकल-घरेलू-उत्पादः) ७.८ प्रतिशतं संवर्धितम्

राज्यमन्त्री जितिन-प्रसादः

वाणिज्य-उद्योग-मन्त्रालयस्य राज्यमन्त्रिणा जितिन-प्रसादेन निगदितं यत् वैश्विक-व्यापार-अनिश्चिततायाः भू-राजनीतिक-तनावस्य च मध्येऽपि वित्तवर्षस्य २०२६-२७ प्रथमत्रैमासिके भारतस्य वास्तविक-'जीडीपी'-वृद्धौ ७.८ प्रतिशतस्य अभिवृद्धिः पञ्जीकृता। अस्याः सिद्धेः श्रेयः दृढायाः आन्तरिक-माङ्गायाः (घरेलू-मांग) तथा च निर्माण-सेवा-क्षेत्रयोः जातेभ्यः विकासेभ्यः दीयते। श्रीप्रसादेन अद्य नवदेहल्यां लिख़्टनश्टाईन-देशस्य उप-प्रधानमन्त्रिण्या तथा च विदेश-पर्यावरण-संस्कृति-मन्त्रिण्या सबीन-मोनाउनी-महोदयया सह आयोजितायां मेलने एषा वार्ता उक्ता। अस्मिन् मेलने लिख़्टनश्टाईन-देशस्य एकम् उच्चस्तरीय-व्यापारिक-प्रतिनिधिमण्डलमपि समुपस्थितमासीत्।श्रीप्रसादः भारतस्य दृढाम् आर्थिकवृद्धिं, विपणौ (विपणने) वर्धमानान् अवसरान् तथा च प्रचलितानां सुधाराणाम् उल्लेखं कुर्वन् अवदत् यत् भारतं दीर्घकालिक-विकासाय उत्सुकेभ्यः वैश्विक-व्यवसायिभ्यः एकं स्थिरं प्रतिस्पर्धि च केन्द्रं रूपेण उद्भवति। सः उभयोः देशयोः मध्ये व्यापारम्, निवेशम्, व्यावसायिक-सम्बन्धान् च सुदृढीकर्तुं विस्तृतासु सम्भावनासु अपि बलं दत्तवान्। अस्मिन् मेलने लिख़्टनश्टाईन-देशस्य संस्थानां (कम्पनीनाम्) कृते भारते स्वव्यापारस्य निवेशस्य च संवर्धनावसरेषु चर्चा सञ्जाता। श्रीप्रसादः तद्देशस्य उद्योगजगतः भारतस्य वर्धमान-विपणि-सम्पदः, दक्ष-कर्मचारिणां, दृढ-मूलसंरचनायाः तथा च अनुकूल-नीतिगत-वातावरणस्य लाभं ग्रहीतुम् अनुरोधं कृतवान्। सः भारतीयसंस्थाभिः सह सहभागितां निवेशं च वर्धयितुम् अपि आह्वानम् अकरोत्। द्वाभ्यामपि पक्षाभ्यां प्रौद्योगिकी-नवोन्मेष-वित्तीयसेवा-निर्माणक्षेत्रेषु परस्परसहयोगस्य सम्भावनासु विचारः विहितः। वाणिज्य-उद्योग-मन्त्रालयस्य अनुसारं लिख़्टनश्टाईन-देशः यूरोपीय-मुक्त-व्यापार-सङ्घस्य (EFTA) देशेषु भारतस्य एकः महत्त्वपूर्णः सहभागी वर्तते।

सर्वकारेण देशस्य

उत्कृष्टाभिनवोद्यमानां (स्टार्ट-अप् इत्येतेषां) सम्माननाय 'राष्ट्रीय-स्टार्ट-अप्-पुरस्काराणां' शुभारम्भः कृतः

सर्वकारेण समग्रदेशस्य उत्कृष्टाभिनवोद्यमानां (स्टार्ट-अप् इत्येतेषां) सम्माननाय अद्य 'राष्ट्रीय-स्टार्ट-अप्-पुरस्काराणां' षष्ठसंस्करणस्य आरम्भः विहितः। एतेषां पुरस्काराणां कृते विंशति-(२०)-क्षेत्रेषु आवेदनं कर्तुं शक्यते। अपि च, महिलानां, छात्राणां, पूर्वोत्तरक्षेत्रस्य च कृते तिस्रः विशेषश्रेणयः निर्धारिताः सन्ति।उद्योग-आन्तरिक-व्यापार-संवर्धन-विभागस्य (DPIIT) सचिवेन अमरदीप-सिंहेन नवदेहल्यां पुरस्काराणाम् उद्घाटनं कुर्वता निगदितं यत् एतेषु पुरस्कारेषु व्यावसायिक-साफल्येन सह सामाजिक-प्रभावः, सतत-विकासः, विस्ताराय सम्भाव्यता च इत्येतेभ्यः अपि महत्त्वं प्रदास्यते। सः देशे अभिनवोद्यमानां प्रवर्धनार्थं वैयक्तिक-क्षेत्रस्य (निजी-क्षेत्रस्य) अधिकाधिक-सहभागितायाः आवश्यकतायां बलं दत्तवान्।एतेषु पुरस्कारेषु कृषिः, वित्तीय-प्रौद्योगिकी (फिन्टेक्), अन्तरिक्षम्, स्वास्थ्यम्, शिक्षा, सुगमता इत्यादयः अनेके क्षेत्राः समाविष्टाः सन्ति। एतेभ्यः पुरस्कारेभ्यः आवेदनानि अस्मिन् वर्षे नवम्बर-मासस्य विंशति-(२०)-दिनाङ्कं यावत् कर्तुं शक्यन्ते।सर्वकारस्य 'स्टार्ट-अप् इण्डिया' इति उपक्रमस्य अन्तर्गतं नूतनोद्यमेभ्यः मान्यता, कर-मुक्तिः, नियमेषु शिथिलता, वित्तीय-साहाय्यं, प्रशिक्षणञ्चेत्यादयः सौविध्यविशेषाः प्रदीयन्ते।